दिनाङ्क :- 07.08.2025

प्रात: - 06:55

**प्रधानमन्त्री- भारतीय कृषि अनुसंधान परिषद्**

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदहेल्यां पूसा इति स्थले भारतीय -कृषि- अनुसंधान परिषद् क्षेत्रे एम.एस.स्वामीनाथन-शताब्दी – अन्ताराष्ट्रिय - सम्मेलनस्य उद्घाटनं विधास्यति।

एतस्मिन् अवसरे श्रीमोदी जनसमूहमपि सम्बोधयिष्यति, अथ खाद्य-शान्ति-इत्येताभ्यां प्रथमं एम.एस.स्वामीनाथन-पुरस्कारमपि प्रदास्यति। सम्मेलनस्य एतस्य विषय:- सदाबहार क्रान्ति, जैव सुख का मार्ग इति, यश्च सर्वेभ्य: भोजन सुनिश्चेतुं प्रोफेसर एम.एस.स्वामीनाथन इत्येतस्य सम्पूर्णं समर्पणं प्रदर्शयति। एष: पुरस्कार: एम.एस.स्वामीनाथन रिसर्च फाउंडेशन अथ विश्व विज्ञान अकादमी इत्येताभ्या एम.एस.स्वामीनाथन इत्येतस्य समर्पणं सम्मानप्रदानाय प्रारब्ध:। एतेन कार्यक्रमेण वैज्ञानिकेभ्य: नीति निर्मातृभ्य: अन्यहितधारकेभ्य: नवा: अवसरा: मिलिष्यन्ति।

**कर्तव्यपथ उद्घाटनं:**

प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् विगतेषु एकादशवर्षेषु भारते पारदर्शी-उत्तरदायी-नागरिक केन्द्रितंशासनं नैरन्तयैण प्रवार्तितम्। श्री मोदी गतदिने नवदेहल्या: कर्तव्यपथे जनसभां सम्बोधयन् एतान् विचारान् प्रकटितवान्। प्रधानमन्त्री समुदीरितवान् यत् अगस्त मास: क्रान्तिपर: मास:।

एतद्पूर्व प्रधानमन्त्री मोदी राष्ट्रियराजधान्या: कर्तव्य-पथे नवनिर्मितं तृतीयं कर्तव्यभवनम् उद्घाटिवान्। एतत् भवनं सेंट्रल विस्टा इति संसद-भवनस्य एव व्यापक परिवर्तनस्य अङ्भूतम् अस्ति।

**राष्ट्रिय- हस्तकरघ-दिवस**

राष्ट्रपतिपदासीना द्रौपदी मुर्मु: अद्य नवदेहल्यां राष्ट्रिय -हस्तकरघ-दिवस समारोहस्य अध्यक्षतां विधास्यति। एष: एकादश: समारोह: भवेत्। वस्तमन्त्रालयेन समायोज्यमाणस्य एतस्य कार्यक्रमस्य उद्देश्यं भारतस्य जीवन्त-हस्त करघक्षेत्रम्, अथ देशस्य ग्रामीण-अर्थव्यवस्थां, सांस्कृतिक निधिं च प्रति सम्मानप्रदानं वर्तते।

एतस्मिन् समारोहे प्रतिष्ठिता: जना:, निर्यातका:, वैदेशिका:, जना:, वरिष्ठा: अधिकारिणश्च सम्मिलिता: स्यु:।

## उत्तराखण्ड- गङ्गानदी (एच एल-2)

उत्तराखण्डे जनानां रक्षोद्धार-कार्यं प्रवर्ततेत। खीर गङ्गा-नद्यां मेघ-विस्फोट-कारणेन दुरापन्नस्य प्रलयङ्करस्य तोयप्लवस्य अनन्तरम् उत्तरकाशी जनपदस्य धरालीति क्षेत्रे युद्धस्तरे रक्षोद्धार-कार्यं प्रवर्ततेतराम्। अत्रान्तरे, मुख्यमन्त्री पुष्कर-सिंह-धामी गतदिने आपदा-प्रभावित- क्षेत्राणां जनै: साकं संभाषणं कृत्वा तेषां कुशलक्षेमं ज्ञातवान्। सहैव आपदा- प्रभावित- परिवारेभ्य: सर्व - सम्भव -सहायता-प्रदानमपि आश्वासितवान्। मुख्यमंत्री प्रावोचत् यत् राज्य - सर्वकारस्य सर्वोच्च-प्राथमिकता इदं सुनिश्चितीकरणम् अस्ति यत् सर्वेभ्य: प्रभावितेभ्य: जनेभ्यः उद्धार-साहाय्यं शीघ्रमेव प्राप्तम्भवेत्।

## संसद् विपक्ष:

बिहारे मतदातृ-सूच्या: विशेष-गहन-पुनरीक्षणं विरुध्य विपक्षि-सांसदा: अद्य संसद्-परिसरे विरोध-प्रदर्शनम् आचरितवन्त:। एतस्मिन् प्रकरणे विपक्षि-सांसदा: संसदि चर्चाया: याचनामपि कृतवन्त:। तदनु सञ्चार-माध्यमानि संसूचयन्, कांग्रेस-दलाध्यक्ष:, राज्यसभायां च विपक्षस्य नेता मल्लिकार्जुन-खड़गे न्यगादीत् यत् विपक्ष-दल-सदस्या: एस.आई.आर. प्रक्रिया-विषये चर्चाम् ईहन्ते।

## रिजर्वबैङ्क-मौद्रिकनीति: (एच एल-4)

भारतीय-रिजर्वबैङ्कम् इत्यस्य मौद्रिक-नीति-समित्या गतदिने रेपो इति परिमिति:प्रतिशतं दशमलवोत्तर-पञ्चाधिक-पञ्च-मिता एव यथावस्थं स्थापयितुं निर्णयः कृतः।